This Question Paper consists **42 questions and 8 printed pages**.
अस्मिन् प्रश्नपत्रे **42** प्रश्नाः एवम् **8** मुद्रित पृष्ठाः सन्ति।

**Roll No.**
**अनुक्रमाङ्कः :**
**अङ्केषु**

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**Code No. कोड नं. 49/S/O/S**

**Set A**

# SANSKRIT
# संस्कृतम्
# (209)

**Day and Date of Examination**
**( परीक्षादिवसः दिनाङ्कश्च )** ________________________

**Signature of Invigilators** **1.** ________________________
**( निरीक्षकहस्ताक्षरद्वयम् )**
**2.** ________________________

**सामान्य अनुदेशाः :**

**1.** अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः।

**2.** निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति।

**3.** वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तरपुस्तिकामध्ये लिखेत्।

**4.** वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि।

**5.** उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।

**6.** स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या **49/S/O/S** अवश्यं लेखनीया।

# SANSKRIT

# संस्कृतम्

**(209)**

**समय : होरात्रयम् ]** **[ पूर्णाङ्काः – 100**

---

**निर्देशा :** (1) अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः सन्ति।

(2) प्रत्येकम् प्रश्नस्य समक्षम् अङ्काः सूचिताः।

(3) **सर्वे** प्रश्नाः **अनिवार्याः**।

---

**खण्डः क**

**पठित अवबोधनम् (55)**

**1.** भूमेः गुरु तरा का अस्ति ? **1**

(A) नदी (B) सरिता (C) माता (D) गङ्गा

**2.** दिनस्य अन्ते रात्रौ किं पिबेत् ? **1**

(A) जलम् (B) दुग्धम् (C) नारिकेलजलम् (D) तक्रम्

**3.** ईशः कथं भुवं सृजति ? **1**

(A) मायया (B) चमत्कृत्या (C) स्वलीलया (D) अहंकृत्या

**4.** किं तपः सर्वोत्तमम् ? **1**

(A) कार्मिकं तपः (B) शारीरं तपः (C) वाचिकं तपः (D) मानसं तपः

**5.** 'मनः' इति पदस्य प्रथमा बहुवचने किं रूपं भवति ? **1**

(A) मनानि (B) मनांसि (C) मनंसी (D) मनसि

6. ‘वीरचरित्र पद्धतिः केषाम् अस्ति’ इत्यत्र केषाम् इति पदे का विभक्तिः ? **1**

(A) द्वितीया (B) चतुर्थी (C) षष्ठी (D) सप्तमी

7. ‘रथारूढ़ः पदातिना सह न युद्धति’ इति कीदृशः न्यायः ? **1**

(A) सामाजिकः (B) सांग्रामिकः (C) वैयक्तिकः (D) सांसारिकः

8. ‘रथारुढ़स्य चन्द्रकेतोः’ इत्यत्र किं विशेषणपदम् ? **1**

(A) चन्द्रकेतोः (B) केतोः (C) रथारुढस्य (D) रुढस्य

9. जृम्भकास्त्रस्य किं वैशिष्ट्यम् ? **1**

(A) जितवीर्यम् (B) अजितवीर्यम् (C) दीप्ततेजः (D) क्षतदीप्तिः

10. ‘मनसो दमनं __________’ इत्यत्र रिक्तस्थाने किं भविष्यति ? **1**

(A) लोभः (B) मोहः (C) दमः (D) क्रोधः

11. ‘जाते, एतत् खलु सर्वम् अवधारय।’ **1+1=2**

इति कः कम्प्रति कथयति ?

12. ‘आश्रम पदं परित्यजन्त्याः मे चरणौ दुःखेन प्रवर्तते’ – **1+1=2**

इति कः कथयति ? चरणौ केन प्रवर्तते ?

13. धर्मस्य लक्षणद्वयं लिखत। **1+1=2**

14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –

गौतमी – जाते ! एष आनन्द परिवाहिन्या दृष्ट्या वीक्षमाणः गुरुः उपस्थितः। आचारं तावत् प्रतिपद्यस्व,

शकुन्तला – तात ! वन्दे।

(i) ‘जाते ! इति पदेन का उद्दिष्टा ? **1**

(ii) गुरोः किं नाम ? **1**

(iii) तस्य दृष्टिः कीदृश्नी ? **1**

15. अधोलिखितस्य एकस्य चरित्रचित्रणं पञ्चवाक्येषु कुरुत – **1x5=5**

चन्द्रकेतुः अथवा कण्वः

16. इयंस दृश्यते गंगा पूज्या त्रिपथगा नदी, **1+1=2**

इयं कस्य उक्तिः ? त्रिपथगायाः अपरं नाम किं ?

17. 'पुत्रोऽहं पृथिव्याः' इति पाठानुसारं अस्माकं माता का मता ? तत्कथम् ? **2**

18. 'अभ्यंगमाचरेन्नित्यं सजराश्रमवातहा' इत्यत्र अभ्यंगेन के लाभाः उक्ताः ? **2**

19. 'सत्याग्रहाश्रमः' इतिपद्यपाठः कस्य ग्रंथस्य अंशः कश्च तस्य लेखकः ? **2**

20. यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः। **3**

दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्।।

इत्यत्र किं दानं राजसम् कथितम् ?

21. अधोलिखित श्लोकस्य अन्वये रिक्तस्थानानि पूरयत– **1x3=3**

आत्मवत् सर्वभूतानि पश्यतोऽस्य पदानुगाः।

गुणै : परवशीभूता व्यवर्धन्त सहस्रशः।।

**अन्वयः** – आत्मवत् (i) __________ पश्यतः अस्य गुणैः (ii) __________ पदानुगाः सहस्रशः (iii) __________ ।

**अथवा**

अधोलिखित भावार्थे रिक्त स्थान पूर्तिं कुरुत –

महात्मनः गांधिनः अनुयायिनः कमपि भेदभावं (i) __________ सर्वान् जनान् (ii) __________ पश्यन्ति स्म। एवं हि महात्मेनः उत्कृष्टैः (iii) __________ प्रभाविता बहवो जनाः तस्य अनुयायिनः अभवन्।

22. रेखांकित पदमाधृत्य प्रश्न निर्माणं कुरुत् : **1+1=2**

(i) ऋष्यमूको गिरिवरः काञ्चनै धातुमिर्कृतः।

(ii) यत्र त्वं राक्षसेन्द्रेण रावणेन हृता बलात्।।

**23.** महात्मन: गांधिन: आश्रमस्य किं नाम? आश्रमात् जनै का प्रेरणा प्राप्यते? **1+1=2**

**24.** मृजया रक्ष्यते रूपं, कुलं वृत्तेन रक्ष्यते। **1+1=2**

इत्यनुसारं रूपस्य कुलस्य च रक्षा कथं भविता?

**25.** अधोलिखित गद्यांशं पठित्वा प्रश्नान् उत्तरत -

भो मूर्ख, न कोऽपिजीव: हृदयं विना जीवति। न वातत् पृथक् कर्तुं शक्यते। अत: त्वं गच्छ पत्नीं च प्रीणय। समाप्ता आवयो: मैत्री।

(i) कस्यचिदपि जीवनं केन विना न संभवति? **1**

(ii) हृदयं कुत: पृथक् कर्तुं न शक्यते? **1**

(iii) कयो: मैत्री समाप्ता? **1**

**26.** अद्यापि अनेन प्रतिपादितान् गणित विषयान् आधृत्य देशे विदेशे च सर्वत्र अनुसंधानम् क्रियते। अस्य ज्योतिर्विज्ञानक्षेत्रे योगदानं प्रशंसन् भारतवर्षे वैज्ञानिका: 'भास्कर' इति उपग्रहयानं निर्मितवन्त:।

(i) कम् विषयमाधृत्य सर्वत्र अनुसंधानम् क्रियते? **1**

(ii) भास्कराचार्यस्य कस्मिन् विज्ञाने योगदानभासीत्। **1**

(iii) 'भास्कर' इति नामकं उपग्रहयानं के निर्मितवन्त:? **1**

**27.** कस्यचित् एकस्य पाठस्य सारं पंचवाक्येषु लिखत् - **1x5=5**

(i) प्रेरणा

(ii) कर्तव्यनिष्ठा

(iii) तेजसां हि न वय: समीक्ष्यते

## खण्ड: - ख

## अनुप्रयुक्त व्याकरणम् (25)

**28.** अधोलिखितानां वर्णानाम् उच्चारणस्थानानि लिखत - **½x4=2**

ट, श, ह, र

**29.** अधोलिखितयो: पदद्वयो: सन्धिच्छेदं कुरुत- **1+1=2**

दीप्ताग्नि:, जितेन्द्रिय:।

**30.** अधोलिखित सन्धीनाम् प्रत्येकस्य एकमुदाहरणं लिखत - **1x3=3**

यण् संधि, दीर्घ संधि, व्यंजन संधि।

31. अस्याः, विदुषोः, अस्माकम्, सर्वासाम् – इति पदेषु काः विभक्तयः कानि च वचनानि? ½x4=2

32. रिक्तस्थानेषु अङ्कांना स्थाने संख्यावाचकपदानि लिखत – 1x3=3

(i) मम पार्श्वे 3 पुस्तकानि सन्ति।

(ii) रथे 4 अश्वाः योजिताः सन्ति।

(iii) त्वं 2 हस्ताभ्यां कार्यं करोषि।

33. रेखांकितपदयोः कौ मूलधातू कः च लकारः? 1+1=2

(i) त्रीणि शिक्षेत गर्दभात्।

(ii) चत्वारि तस्य वर्धन्ते

34. रेखाङ्कितपदयोः कौ मूलधातू कः च लकारः? 1+1=2

(i) वाङ्मयं तप उच्यते।

(ii) दूरे क्षिप तव शुद्धां शाटीम्।

35. अधोलिखितयोः समस्तपदयोः विग्रहं लिखत – 1+1=2

भूमिदानम्, कर्तव्यनिष्ठा

36. अधोलिखित विग्रहाणां कृते समस्तपदं लिखत – 1+1=2

न साधुः। निर्गता दया यस्मात्।

37. रिक्तस्थाने किं पदं भविष्यति – 1+1=2

(i) पिता अद्यैव मां पत्रं _________ (लिख् + क्तवतु)

(ii) अनागत विधाता सरोवरात् _________ (निस्क्रम् + क्त)

38. रेखाङ्कितपदेषु रिक्तस्थानपूर्तिं कुरुत – 1x3=3

(i) स्वार्थान्धाः जनाः __________ अपकारं कुर्वन्ति (पर)

(ii) अद्यत्वे __________ जीवाः न मिलन्ति। (वन)

(iii) छात्राः ___________ साफल्यं प्राप्नुवन्ति। (परिश्रम)

## खण्डः - ग

## रचनाकौशलम् (20)

**39.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त प्रश्नान् उत्तरत - **1x5=5**

हिमालय पर्वते अनेकानि दर्शनीय स्थानानि सन्ति। तत्र प्रतिवर्षं भक्ताः श्रद्धालवश्च गत्वा बद्रीनाथ-केदारनाथादिषु मंदिरेषु भगवद्दर्शनं कुर्वन्ति। अद्यापि अनेकासु गुहासुमुनयः उषित्वातपः तपन्ति। अतः हिमालयस्य महत् गौरवं वर्तते। अस्य रक्षणे एव भारतस्य रक्षास्ति। वयं प्रतिज्ञां कुर्मः यत् आवश्यकतायां सत्याम् अस्य रक्षार्थं प्राणान् अपि त्यक्ष्यामः।

**प्रश्नाः**

(i) अनेकानि दर्शनीयानि स्थानानिकस्मिन् पर्वते सन्ति ?

(ii) भक्ताः कुत्र गत्वा भगवद्दर्शनं कुर्वन्ति ?

(iii) मुनयः कुत्र उषित्वा तपः कुर्वन्ति ?

(iv) 'निवासं कृत्वा' इत्यर्थे किं पदं गद्यांशे प्रयुक्तम् ?

(v) 'प्राणान्' इति शब्दे का विभक्तिः ?

**40.** अधोलिखितविषयम् अधिकृत्य मञ्जूषायां प्रदत्त पद सहायतया पञ्चवाक्येषु एकम् अनुच्छेदम् लिखत् - **1x5=5**

'सत्संगतिः'

**मञ्जूषा**

| |
|---|
| सतां, संगतिः, कथ्यते, सत्संगतिः, सर्वेषां गुणानाम्, आधारः, अवगुणानां, भवति, अपाकरणम्, कीटः, पुष्पाणां, संगत्या, देवानां, आरोहति, शिरसि |

**41.** भवान् सुरेशः, छांत्रावासे निवसति। आगरास्थं ताजभवनं द्रष्टुं शैक्षिकभ्रमणाय गन्तुं भवान् इच्छति। तदर्थं धन प्रेषणाय पितरं प्रति लिखितं पत्रं मंजूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत - **1x5=5**

विद्यालय छात्रावासः
प्रयागनगरम्

परमादरणीयाः पितृमहोदयाः,

सादरं प्रणामामि।


सविनयं (i) __________ यत् मम अर्द्धवार्षिकी परीक्षा समाप्ताजाता। मम परीक्षा (ii) __________ जाता। अग्रिमे अवकाशे अहं गृहं न (iii) __________ ।तत्र कारणम् अस्ति यत् विद्यालयेन एकस्य (iv) __________ आयोजनं कृतम्। एषा यात्रा आगरास्थ ताजभवनं द्रष्टुम् आयोजिता वर्तते। अतः तत्र व्ययार्थंपंचशतं (v) __________ भवन्तः प्रेषयन्तु। सर्वेभ्यः मम प्रणामाः।

भवतां प्रिय पुत्रः
सुरेशः

**मञ्जूषा**

| |
|---|
| शोभना, निवेदनम्, आगमिष्यामि, शैक्षिक भ्रमणस्य, सूप्यकाणि, प्रणामाः |

**42.** अधोलिखितं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि लिखत – **1x5=5**



**मञ्जूषा**

| |
|---|
| गृहस्य, मम, समीपे, एव, हट्टम्, अस्ति। तत्र विविधानि, आपणानि, सन्ति, जनाः तत्र, गत्वा प्रतिदिनं, दैनिकोपयोगाय वस्तूनि, क्रीणन्ति, तत्र, शाकादीनाम्, विक्रय्ः, अपि, जनानां, महान्, अत्र, सम्मर्दः, दृश्यते। |

**- o O o -**